# Raisina Bengali School, Mandir Marg
## Class : 9th
## sanskrit
## practice material

**Roll no. :** **Duration -**
**Date :** **MM - 151**

1 अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत– 10

ये जनाः दृढ़प्रतिज्ञाः भवन्ति तेषां कृते तेषां व्रतमेव सर्वप्रमुखं भवति। संसारे ईदृशाः जनाः भूतवन्तः ये जीवनस्य अन्तिमे क्षणेऽपि सत्यस्य आश्रयं नात्यजन्। स्वात्मनः विपर्यये किञ्चिद् कर्म अपि नाकुर्वन्। अनेकासु विपत्तिषु अपि नृपः हरिश्चन्द्रः सत्यस्याश्रयं नात्यजत्। महाराणा प्रतापः आजीवनं वने-वनेऽभ्रमत्। स्वभार्यां बालौ च बुभुक्षया निष्प्राणान्निव पश्यन्नपि सः तेषां वार्तां न अमन्यत। ते तस्मै पराधीनं जीवनं जीवितुम् अकथयन्। आधुनिके काले महर्षिः दयानन्दोऽपि सत्यस्य पालने वेदप्रचारे च स्वजीवनं बलिदानम् अकरोत् परं सत्यस्य मार्गं नात्यजत्। एवमेव पुण्यभूमिभारते अनेके ईदृशाः महापुरुषाः अजायन्त, ये स्वजन्मना इमां भूमिं पवित्राम् अकुर्वन्। अद्यापि तेषां चरणचिह्नानि मानवान् सत्याचरणं प्रति प्रेरयन्ति।

एकपदेन उत्तरत–
महर्षिः दयानन्दः किं बलिदानम् अकरोत्?
कः नृपः सत्यस्य आश्रयं नात्यजत्?
कः सत्यस्याश्रयं नात्यजत्?
के स्वजन्मना इमां भूमिं पवित्राम् अकुर्वन्?
पूर्णवाक्येन उत्तरत–
दृढप्रतिज्ञ-जनानां कृते किं सर्वप्रमुखं भवति?
अद्यापि किं मानवान् सत्याचरणं प्रति प्रेरयन्ति?
भाषिककार्यम्–
'नृपः हरिश्चन्द्रः' अनयोः पदयोः विशेषणं किम्?
(क) हरिश्चन्द्रः (ख) नृपः

(ग) नृपहरिः (घ) नृपहरिश्चन्द्रः
'अत्यजन्' इत्यस्याः क्रियायाः कर्तृपदं किम्?
(क) ये (ख) जनाः
(ग) माता (घ) विमाता
'पत्नीम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?
(क) नृपः (ख) भार्याम्
(ग) बुभुक्षया (घ) वार्तां
अनुच्छेदे 'मिथ्यायाः' पदस्य कः विपर्ययः आगतः?
(क) आश्रयम् (ख) असत्यस्य
(ग) मार्गम् (घ) सत्यस्य
उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।

2 अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत– 10

जगति किञ्चिदपि कार्यम् असाध्यम् असम्भवं च नास्ति। असम्भव-असाध्य-कठिनादयः शब्दाः कर्महीनेभ्यः सन्ति। सम्राजे नेपोलियनाय इमे शब्दाः तस्य शब्दकोषे नासन्। साहसी बापूमहोदयः विश्वं चकितमकरोत्। बापू शरीरात् शक्तिशाली आसीत् किम्? न। सः तु एकवस्त्रः लगुडेन एव चलति स्म। परं तस्य विचाराः शक्तिशालिनः भावनाश्च सशक्ताः आसन्। तस्य साहसं दृष्ट्वा कोटिकाः भारतीयाः तस्य पृष्ठे एव आसन्। ब्रिटिशसाम्राज्यः तस्मात् कम्पितोऽभवत्। अहिंसायाः आश्रयेण सः रक्तपातं विना भारतं स्वतन्त्रम् अकारयत्। इदं विश्वस्य एकम् अद्वितीयं विलक्षणं वा उदाहरणं वर्तते।य दा गान्धिमहोदयः अहिंसायाः उद्घोषम् अकरोत् तदा जनाः अहसन्। ते कथयन्ति स्म यत्–अहिंसया सत्येन वा स्वराज्यं प्राप्यते किम्? परं सः सतर्कः सावधानः वा भूत्वा स्व-उद्देश्यं प्रति अचलत् साहसं च न अत्यजत्। अन्ते विजयोऽपि अहिंसायाः एव अभवत्। अतः कथ्यते–"उद्योगिनं पुरुषसिंहम् उपैति लक्ष्मीः।"

एकपदेन उत्तरत–
बापूमहोदयः शरीरात् कीदृशः न आसीत्?
अन्ते विजयः कस्याः अभवत्?
साहसी बापूमहोदयः कम् चकितमकरोत्?
केन स्वराज्यं प्राप्यते किम्?
पूर्णवाक्येन उत्तरत–

सः रक्तपातं विना कथं भारतं स्वतन्त्रम् अकारयत्?
के शब्दाः कर्महीनेभ्यः सन्ति?
भाषिककार्यम्–
'लक्ष्मीः' इत्यस्य कर्तृपदस्य क्रियापदं किम्?
(क) पुरुषसिंहम् (ख) सिंहम् (ग) उद्योगिनम् (घ) उपैति
'स्वतन्त्रताम्' इत्यस्य पदस्य कः पर्यायः अत्र प्रयुक्तः?
(क) स्वराज्यम् (ख) उद्योगिनम् (ग) उद्घोषम् (घ) असम्भवम्
'हिंसया' इत्यस्य पदस्य कः विपर्ययः अनुच्छेदे आगतः?
(क) अहिंसायाः (ख) अहिंसया (ग) आश्रयेण (घ) लगुडेन
'अकरोत्' इत्यस्याः क्रियायाः कर्तृपदं किम्?
(क) गान्धिः (ख) गान्धिमहोदयः (ग) उद्घोषम् (घ) अहिंसायाः
उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।

3 अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत– 10

आधुनिक-विकासशीलविश्वस्य सर्वविकराला समस्या आतङ्कवादो वर्तते। अनेन अभिशापेन सम्पूर्णं विश्वमेव स्वाङ्के स्थापितम्।
सम्पूर्णे विश्वे प्रतिदिनमेव अस्य विनाशलीला श्रूयते एव। गतवर्षस्य नवम्बरमासे अस्माकं देशस्य आर्थिकराजधान्यां मुंबईनगर्यामपि सागरमार्गेण प्रातिवेशिकदेशात् पाकिस्तानादागत्य आतङ्कवादिनः आक्राम्यन्त। तेन कारणेन अनेकशः जनाः गतप्राणाः अभवन्। बहुमूल्याः सम्पत्तयः क्षतिग्रस्ताः अभवन्। अतीव सुन्दरम् इदं नगरं धूलिध्वस्तम् अभवत्। अधुना तु इदम् अभवत् यत् ये जनाः देशाश्च आतङ्कवादिनः पालितवन्तः तान् एव ग्रस्तुम् आतङ्किनः सज्जिताः सन्ति। अधुना तु श्रीलंकायाः क्रिकेट-क्रीडकानामुपरि अपि लाहौरनगरे ते आक्रमणं कृतवन्तः। तेन दुराचरणेन एव विश्वस्य दृष्ट्यां पाकिस्तानः एकः असफलः राष्ट्रोऽभवत्। आवश्यकता तु इदं यत् सम्पूर्णेन विश्वेन मिलित्वा एव आतङ्कवादस्य निर्मूलनाय प्रयत्नाः करणीयाः अन्यथा सम्पूर्णः संसारः आतङ्कवादस्य अग्नौ भस्मसाद् भविष्यति।
एकपदेन उत्तरत–
आतङ्कवादिनः कुतः आगत्य मुम्बईनगर्याम् आक्राम्यन्त?
कः असफलः राष्ट्रोऽभवत्?
आधुनिक-विकासशीलविश्वस्य सर्वविकराला समस्या कः वर्तते?

सम्पूर्णः संसार कस्य अग्नौ भस्मसाद् भविष्यति?

पूर्णवाक्येन उत्तरत–

आतङ्किनः कान् ग्रस्तुम् सज्जिताः सन्ति?

अधुना लाहौरनगरे आतङ्किनः केषामुपरि आक्रमणं कृतवन्तः?

भाषिककार्यम्–

'अनेन अभिशापेन' इमे पदे कस्मै प्रयुक्ते स्तः?

(क) आतङ्कवादाय (ख) द्ररिद्रतायै (ग) अशिक्षायै (घ) कुपोषणाय

'नगरं धूलिध्वस्तम्' अनयोः पदयोः विशेष्यपदं किम्?

(क) धूलि (ख) ध्वस्तम् (ग) धूलिध्वस्तम् (घ) नगरम्

'मृताः' अस्य पदस्य अर्थे किं पदम् आगतम्?

(क) गतप्राणाः (ख) क्षतिग्रस्ताः (ग) सज्जिताः (घ) कृतवन्तः

'भविष्यति' इति क्रियायाः कर्तृपदं किम्?

(क) अन्यथा (ख) सम्पूर्णः (ग) संसारः (घ) भस्मसाद्

उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

4 अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत– 10

एकदा एकः वैदेशिकः प्रथम-राष्ट्रपतेः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्। राष्ट्रपतेः परिचारकः तं आतिथ्यगृहे प्रतीक्षितुम् अकथयत् तम् असूचयत् च यद् राष्ट्रपतिमहोदयः सम्प्रति पूजां करोति। स अतिथिः ज्ञातुम् ऐच्छत् यद् राष्ट्रपतिः कथं करोति पूजाम्? सङ्कोचं कुर्वन् अपि स अन्तः पूजागृहं प्रविष्टः। राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डं सोऽवन्दत श्रद्धया च तत्र उपाविशत्। पूजां परिसमाप्य राष्ट्रपतिमहोदयः पूजागृहे स्थितं तं दृष्ट्वा प्रसन्नः अभवत्, ससम्मानं तम् अन्तः अनयत्। आगन्तुकस्य ललाटे विद्यमानं भावं दृष्ट्वा श्रीराजेन्द्रप्रसादमहोदयः तस्य कौतूहलं विज्ञाय तस्मै सम्बोधयत्– एतद् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। एतेन मृत्पिण्डेन एव भारतीयाः महतीम् अन्नात्मिकां सम्पदं प्राप्नुवन्ति। अत एव वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः। अस्माकं विचारे तु मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेषु अपि ईश्वरस्य सत्ता अस्ति।

एकपदेन उत्तरत–

कः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्?

भारतभूम्याः प्रतीकम् किम् अस्ति?

अचेतनेषु अपि कस्य सत्ता अस्ति?

भारतीयाः केन महतीम् अन्नात्मिकां सम्पदं प्राप्नुवन्ति?
पूर्णवाक्येन उत्तरत—
राष्ट्रपतिमहोदयः आगन्तुकं कुत्र दृष्ट्वा प्रसन्नः अभवत्?
राजेन्द्रप्रसादमहोदयः आगन्तुकस्य कौतूहलं विज्ञाय तस्मै किं सम्बोधयत्?
भाषिककार्यम्—
'प्राप्नुवन्ति' अस्याः क्रियायाः कर्तृपदं किम्?
(क) भारतीयाः (ख) महतीम् (ग) सम्पदम् (घ) प्रतीकम्
'मृत्पिण्डं दृष्ट्वा सोऽवन्दत' अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?
(क) वैदेशिकाय (ख) भारताय (ग) दर्शनाय (घ) राष्ट्रपतये
'भावम्' इति विशेष्यस्य अत्र किं विशेषणम् वर्तते?
(क) ससम्मानम् (ख) तम् (ग) विद्यमानम् (घ) प्रतीकम्
'चिह्नम्' अस्य कः पर्यायः अत्र प्रयुक्तः?
(क) मृत्पिण्डम् (ख) प्रतीकम् (ग) दर्शनम् (घ) सम्पदम्
उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।

5 अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत— 10

ज्ञानराशेः सञ्चितः कोष एव साहित्यः वर्तते। प्रत्येकं भावानां प्रकटने योग्या निर्दोषा भूत्वा अपि यदि कापि भाषा स्व-साहित्यस्य रक्षणं न करोति, तर्हि सा रूपवती भिक्षुणी इव कदापि आदरणीया भवितुं न शक्नोति। अतः तस्याः शोभा, श्री, सम्पन्नता, मानं मर्यादाश्च तस्याः साहित्ये एव आधारिताः भवन्ति। कस्यचिदपि जातिविशेषस्य उत्कर्ष-अपकर्षयोः, सङ्गठनस्य तस्याः ऐतिहासिक- घटनाचक्राणां राजनैतिकपरिस्थितिनाञ्च प्रतिबिम्बं तस्याः ग्रन्थसाहित्ये एव प्राप्तुं शक्यते। कस्याश्चिद् जातेः सामाजिकी शक्तिः सजीवता वा सामाजिकी अशक्तिः निर्जीवता वा सभ्यतायाः असभ्यतायाः च निर्णायकः एकमात्रं साहित्यः एव वर्तते। यस्मिन् जातिविशेषे साहित्यस्य अभावो न्यूनता वा दृश्येत तर्हिं निस्संदेहे सा जातिः असभ्या अपूर्णा वा अस्ति इति जानीयात्। यस्याः जातेः सामाजिकी अवस्था यादृशी भवति, तस्याः साहित्योऽपि तादृशः एव भवति। जातीनाम् क्षमता सजीवता च साहित्यरूपदर्पणे एव द्रष्टुं शक्येते।

एकपदेन उत्तरत—
कस्याः सञ्चितः कोषः साहित्यः वर्तते?
यस्मिन् जातिविशेषे साहित्यस्य अभावः दृश्येत, तर्हि सा जातिः कीदृशी जानीयात्?

सभ्यतायाः असभ्यतायाः च निर्णायकः कः वर्तते?
भाषायाः शोभा, श्री, सम्पन्नतामर्यादाश्च कस्मिन् एवं आधारिताः भवन्ति?
पूर्णवाक्येन उत्तरत–
साहित्यरूपदर्पणे के द्रष्टुं शक्येते?
जातिविशेषस्य ग्रन्थे कानि प्राप्तुं शक्यन्ते?
भाषिककार्यम्–
'सञ्चितः कोषः' अनयोः पदयोः विशेषणं किम्?
(क) सञ्चितः (ख) कोषः (ग) निर्णायकः (घ) साहित्यः
अनुच्छेदे 'सम्माननीया' इति पदस्य कः पर्यायः आगतः?
(क) आधारिता (ख) सम्पन्नता (ग) आदरणीया (घ) सभ्यता
'वर्तते' इति क्रियायाः कर्तृपदं किम्?
(क) सञ्चितः (ख) साहित्यः (ग) कोषः (घ) एव
अनुच्छेदे के पदे विपर्यये स्तः?
(क) सजीवता-निर्जीवता (ख) रूपवती-भिक्षुणी (ग) अभावः-न्यूनता (घ) अशक्तिः-निर्जीवता
उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।

6 उचितविभक्तिपदैः वाक्यानि पूरयत– 1

(i) (नदी) .................................... उभयतः व`क्षाः शोभन्ते।

(ii) छात्राः (कक्षा) ......................... बहिः कोलाहलं व्रुर्वन्ति।

(iii) (भोजन) ............................ पूर्वं हस्तौ अवश्यं प्रक्षालय।

(iv) देवी ............................ अलम्।
(क) असुरम् (ख) असुरेभ्यः (ग) असुरेषु (घ) असुरैः

7 उचितविभक्तिपदैः वाक्यानि पूरयत– 1

(i) ............... पुरतः जनाः द्यूतक्रीडां क्रीडन्ति। (व्यायामशाला)

(ii) ...................................... प`ष्ठतः कः तिष्ठति (अजय)

(iii) .................... मम विद्यालयः श्रेष्ठतमः अस्ति। (विद्यालय)

(iv) ....................... प्रति दयां व्रुरु। (दीन)
(क) दीनेभ्यः (ख) दीनानाम् (ग) दीनान् (घ) दीनेषु

8 उचितविभक्तिपदैः वाक्यानि पूरयत– 1

(i) यः परेभ्यः सर्वमपर्यीति तस्मै (तरु) ........................ नमः।

(ii) (व`क्ष) ........................................ परितः जलम् अस्ति।

(iii) बालकः (सिंह) ............................................... बिभेति।

(iv) ....................... विहीनः पशुः। (विद्या)
(क) विद्यायाः (ख) विद्यया (ग) विद्याम् (घ) विद्याः

9 उचितविभक्तिपदैः वाक्यानि पूरयत– 1

(i) (विद्यालय) .................................... परितः व`क्षाः सन्ति।

(ii) (श्रीगुरु) .......................................................... नमः।

(iii) बालकः (सिंह) ........................................... बिभेति।

(iv) अलम् ......................। (परिश्रम)
(क) परिश्रमेण (ख) परिश्रमाय (ग) परिश्रमात् (घ) परिश्रमम्

10 उचितविभक्तिपदैः वाक्यानि पूरयत– 1

(i) ............................ परितः पुष्पाणि न सन्ति। (राजमार्ग)

(ii) सज्जनाः .................................... सह वदन्ति (सज्जन)

(iii) एतानि वस्त्राणि ................................ अलम्। (भिक्षुक)

(iv) ............................ विहीनः पशुः।
(क) विद्या (ख) विद्यायाम् (ग) विद्याः (घ) विद्यया

11 निम्नलिखितान् अनुच्छेदान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत– 6

पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याश्चैका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान्निक्षिप्य पुत्रीमादिदेश – सूर्यातपे तण्डुलान् खगेभ्यो रक्ष। किञ्चित्कालादनन्तरम् एको विचित्रः काकः समुड्डीय तामुपाजगाम।

I. एकपदेन उत्तरत–

(i) वृद्धा स्त्री कीदृशी आसीत्?

(ii) वृद्धायाः कीदृशी दुहिता आसीत्?

II. पूर्णवाक्येन उत्तरत–

(i) पुत्रीं माता किम् आदिदेश?

(ii) किञ्चित्कालानन्तरम् किम् अभवत्?

III. भाषिककार्यम्–

(i) अनुच्छेदे 'न्यवसत्' इति क्रियापदस्य कर्तृपदं किमस्ति?
(क) एका (ख) दुहिता (ग) निर्धना (घ) स्त्री

(ii) 'दुहिता विनम्रा' अनयोः पदयोः विशेषणपदं किम्?
(क) विनम्रा (ख) दुहिता (ग) विनम्रः (घ) दुहिताः

(iii) अस्मिन् अनुच्छेदे 'धनवती' इतिपदस्य कः विपर्ययः आगतोऽस्ति?
(क) वृद्धा (ख) निर्धना (ग) ग्रामे (घ) एका

(iv) अनुच्छेदे 'जननी' इत्यस्य पदस्य कः पर्यायः आगतः?
(क) माता (ख) निर्धना (ग) एका (घ) स्त्री

12 निम्नलिखितान् अनुच्छेदान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत– 6

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत्–तण्डुलान् मा भक्षय। मदीया माता अतीव निर्धना वर्तते। स्वर्णपक्षः काकः प्रोवाच, मा शुचः। सूर्योदयात्प्राग् ग्रामाद्बहिः पिप्पलवृक्षमनु त्वयागन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि। प्रहर्षिता बालिका निद्रामपि न लेभे।

I. एकपदेन उत्तरत–

(i) स्वर्णकाकस्य चञ्चुः कीदृशः आसीत्?

(ii) बालिकायाः माता कीदृशी आसीत्?

II. पूर्णवाक्येन उत्तरत–

(i) स्वर्णकाकं निवारयन्ती सा किं प्रार्थयत्?

(i) स्वर्णपक्षः काकः किं प्रोवाच?

III. भाषिककार्यम्–

(i) अनुच्छेदे 'हसितुम्' इत्यस्य पदस्य कः विपर्ययः लिखितः?
(क) रुदितुम् (ख) रोदितुम् (ग) रोतुम् (घ) रोदतुम्

(ii) 'रोदितुमारब्धा' इत्यस्याः क्रियायाः अनुच्छेदे कर्तृपदं किं वर्तते?
(क) बालिका (ख) विलोक्य (ग) तम् (घ) हसन्तम्

(iii) 'अहं तुभ्यं तण्डुलमूल्यं दास्यामि।' अत्र 'अहम्' पदं कस्मै आगतम्?
(क) कन्यायै (ख) वृद्धायै (ग) काकाय (घ) स्वर्णकाकाय

(iv) 'प्रहर्षिता बालिका निद्रामपि न लेभे'। अत्र वाक्ये विशेषणपदं किमस्ति?
(क) बालिका (ख) निद्राम् (ग) प्रहर्षिता (घ) लेभे

13 निम्नलिखितान् अनुच्छेदान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत– 6

अस्ति हिमवान् नाम सर्वरत्नभूमिर्नगेन्द्रः। तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम्। तत्र जीमूतकेतुरिति श्रीमान् विद्याधरपतिः वसति स्म। तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः। स राजा जीमूतकेतुः तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत्। स महान् दानवीरः सर्वभूतानुकम्पी च अभवत्। तस्य गुणैः प्रसन्नः स्वसचिवैश्च प्रेरितः राजा कालेन सम्प्राप्तयौवनं तं यौवराज्येऽभिषिक्तवान्। यौवराज्ये स्थितः स जीमूतवाहनः कदाचित् हितैषिभिः पितृमन्त्रिभिः उक्तः– "युवराज! योऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठिति स तव सदा पूज्यः। अस्मिन् अनुकूले स्थिते शक्रोऽपि नास्मान् बाधितुं शक्नुयात्" इति।

I. एकपदेन उत्तरत–

(i) श्रीमतः विद्याधरपतेः किं नाम आसीत्?

(ii) स राजा कीदृशं पुत्रं प्राप्नोत्?

II. पूर्णवाक्येन उत्तरत–

(i) नृपस्य गृहोद्याने कः स्थितः आसीत्?

(ii) कदाचित् हितैषिभिः पितृमन्त्रिभिः कः उक्तः?

III. भाषिककार्यम्–

(i) 'शक्नुयात्' इति क्रियायाः अनुच्छेदे कर्तृपदं किम्?
(क) शक्रः (ख) शक्रोऽपि (ग) बाधितुम् (घ) अस्मान्

(ii) अनुच्छेदे 'सम्पूज्य' इति पदस्य कः पर्यायः लिखितः?
(क) तम् (ख) कल्पतरुम् (ग) आराध्य (घ) तत्प्रासादात्

(iii) 'अनुच्छेदे 'स राजा जीमूतकेतुः' इत्यस्य कर्तृपदस्य क्रियापदं किं वर्तते?
(क) स्थितः (ख) अस्ति (ग) प्रेरितः (घ) प्राप्नोत्

(iv) 'हितैषिभिः पितृमन्त्रिभिः' अनयोः पदयोः विशेषणपदं किम्?
(क) पितृ (ख) मन्त्रिभिः (ग) हितैषिभिः (घ) हितैषी

14 निम्नलिखितान् अनुच्छेदान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत– 6

अथ पित्रा 'तथा' इति अभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुम् उपगम्य उवाच–"देव! त्वया अस्मत्पूर्वेषाम् अभीष्टाः कामाः पूरिताः, तन्ममैकं कामं पूरय। यथा पृथ्वीमदरिद्रां पश्यामि, तथा करोतु देव" इति। एवंवादिनि जीमूतवाहने "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात् तरोरुदभूत्।
क्षणेन च स कल्पतरुः दिवं समुत्पत्य भुवि तथा वसूनि अवर्षत् यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

I. एकपदेन उत्तरत–

(i) कः कल्पतरुम् उपगम्य उवाच?

(ii) क्षणेन सः कल्पतरु किम् अवर्षत्?

II. पूर्णवाक्येन उत्तरत–

(i) जीमूतवाहने एवं वादिनि कीदृशी/का वाक् तस्मात् तरोः उदभूत्?

(ii) कथं सर्वत्र यशः प्रथितम्?

III. भाषिककार्यम्–

(i) 'अभीष्टाः कामाः' अनयोः पदयोः विशेष्यपदं किमस्ति?
(क) कामाः (ख) कामः (ग) अभीष्टः (घ) अभीष्टाः

(ii) अनुच्छेदे 'वृक्षात्' इत्यस्य पदस्य कः पर्यायः आगतः?

(क) तरोः (ख) तरुः (ग) तरोरुद (घ) तरोरुदभूत्

(iii) "एषोऽहं यातोऽस्मि"। अत्र 'अहम्' पदं कस्मै आगतम्?

(क) पुत्राय (ख) राजपुत्राय (ग) नृपाय (घ) तरवे

(iv) अनुच्छेदे 'अवर्षत्' इति क्रियापदस्य कर्तृपदं किमत्र प्रयुक्तम्?

(क) क्षणेन (ख) च (ग) कल्पतरुः (घ) सः

15 निम्नवाक्येषु रेखाङ्कितानां पदानां स्थानेषु प्रश्नवाचकं पदं लिखत– 2

(i) हिमवान् नाम सर्वरत्नभूमिः नगेन्द्रः अस्ति।

(क) कः (ख) केन (ग) किम् (घ) का

(ii) तत्र जीमूतकेतूः इति विद्याधरः वसति स्म।

(क) कः (ख) के (ग) कानि (घ) किम्

(iii) तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः।

(क) कः (ख) कथम् (ग) कीदृशः (घ) काः

(iv) सः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्।

(क) का (ख) कदा (ग) काः (घ) कीदृशः

16 अधोलिखितेषु पदेषु उपसर्गान् धातून् च पृथक् कृत्वा लिखत– 4

| क्रियापदम् | उपसर्गः | धातुः |
|---|---|---|
| (i) उत्तिष्ठति | .................. | .................. |
| (ii) निरगच्छत् | .................. | .................. |
| (iii) निस्सरतु | .................. | .................. |

(iv) संवदन्ति .................... ....................

17 अधोलिखितेषु पदेषु उपसर्गान् धातून् च पृथक् कृत्वा लिखत– 4

| क्रियापदम् | उपसर्गः | धातुः |
| --- | --- | --- |
| (i) प्रत्यवदत् | .................... | .................... |
| (ii) सुशोभते | .................... | .................... |
| (iii) प्रभवति | .................... | .................... |
| (iv) अनुकरोति | .................... | .................... |

18 अधोलिखितेषु पदेषु उपसर्गान् धातून् च पृथक् कृत्वा लिखत– 4

| क्रियापदम् | उपसर्गः | धातुः |
| --- | --- | --- |
| (i) प्रासीदत | .................... | .................... |
| (ii) अवागच्छ | .................... | .................... |
| (iii) उत्थापयामि | .................... | .................... |
| (iv) उन्नयति | .................... | .................... |

19 अधोलिखितेषु पदेषु उपसर्गान् धातून् च पृथक् कृत्वा लिखत– 4

| क्रियापदम् | उपसर्गः | धातुः |
|---|---|---|
| (i) अपाकुर्व | .................. | .................. |
| (ii) विजयते | .................. | .................. |
| (iii) परितुष्यति | .................. | .................. |
| (iv) उपविशामि | .................. | .................. |

20 कोष्ठकात् शुद्धपदानि चित्वा रिक्तस्थानेषु लिखत– 4

(i) हे प्रभो! मयि ..................................................। (प्रासीदतु / प्रसीदतु)

(ii) गुरुः शिष्यस्य अज्ञानम् ......................................। (उपहरति / अपहरति)

(iii) वानराः जनान् ..................................................। (अनुकुर्वन्ति / अन्वकुर्वन्ति)

(iv) अहं संस्कृतम् ..................................................। (अवजानामि / अवाजानामि)

21 मञ्जूषायाः उचितपदैः निम्नलिखितानि पत्राणि पूरयत– 5

भवती मधुरिमा स्वक्षेत्रस्य महिलाछात्राणां सुरक्षार्थं स्वक्षेत्रे स्थितं आरक्षीनिरीक्षकम् (पुलिस इंस्पेक्टर) पत्रं लेखितुम् इच्छति। मञ्जूषाया: सहायतया तत् पत्रं सम्पूर्य लिखतु भवती–

(*i*) ........................
विवेक विहार: नवदिल्लीत:
दिनांक: ........................

सेवायाम्,
प्रभारी आरक्षीनिरीक्षकमहोदया:
(*ii*) ........................
विवेक विहार: नवदिल्ली
सप्रेम अभिवादनम्।
विषय: – स्वक्षेत्रस्य (*iii*) ........................ सुरक्षार्थं प्रबन्धं कर्तुं निवेदनम्।
महोदया:!

अहं भवतां क्षेत्रस्य एका (*iv*) ........................ अस्मि। अस्मात् क्षेत्रात् अनेका: छात्रा: निकटे क्षेत्रे एव स्थिते विवेकानन्द महिला महाविद्यालये (*v*) ........................ गच्छन्ति। तासु काश्चित् पदाति:, काश्चित् बसयानेन काश्चिच्च द्विचक्रिकाभि: गच्छन्ति। परम् अस्मिन् (*vi*) ........................ क्षेत्रस्य केचिद् असामाजिका: तत्त्वा: ता: (*vii*) ........................ । मार्गेषु ता: प्रति अभद्रतां कुर्वन्ति। अत: तेषां भयात् छात्रा: (*viii*) ........................ गन्तुं त्रस्यन्ति। अत: भवतां कृते निवेदनं वर्तते यत् भवन्त: तासां (*ix*) ........................ समुचितां व्यवस्थां कारयन्तु येन तासां पठनस्य हानि: न भवेत्।
अहं भवताम् आभारिणी भविष्यामि।
सधन्यवादम्।

प्रार्थी
(*x*) ........................

मञ्जूषा

| |
|---|
| पठितुम्, महाविद्यालयम्, 10/17 पञ्चवटी, मधुरिमा, छात्रा, सुरक्षार्थम्, समये, आरक्षी कार्यालय:, छात्राणाम्, पीडयन्ति |

22 **मञ्जूषाया: उचितपदै: निम्नलिखितानि पत्राणि पूरयत–** 5

भवतः नाम धनराजः वर्तते। भवान् स्वक्षेत्रस्य नगरनिगम– आयुक्ताय क्षेत्रे भ्रमणं कुर्वतः पशून् ग्राहयितुं पत्रं लेखितुम् इच्छति। अतः मञ्जूषायाः सहायतया तत्पत्रं सम्पूर्य लिखतु भवान्–

10/40 एफ० अलकापुरी
गाज़ियाबादः (उ०प्र०)
तिथिः ........................

सेवायाम्,
श्रीमन्तः (*i*) ........................
नगरनिगम गाज़ियाबादः
सप्रेम नमस्कारः
विषयः – क्षेत्रे अनावश्यकं भ्रमणं कुर्वतः स्वामिहीनान् (*ii*) ........................ ग्राहयितुं पत्रम्।
महोदय,
निवेदनम् अस्ति यत् अस्मिन् क्षेत्रे विगत केभ्यश्चित् (*iii*) ........................ केचित् स्वामिहीनाः पशवः इतस्ततः भ्रमन्ति। ते कदाचिदपि आगत्य जनानां (*iv*) ........................ हानिं कुर्वन्ति। केचित्तु गृहेषु अपि बलपूर्वकं प्रविश्य (*v*) ........................ खादन्ति इतस्ततश्च विस्तीरयन्ति। कदाचित्तु मार्गेषु चलतः (*vi*) ........................ प्रहृत्य रुग्णान् अपि कुर्वन्ति।
अनेन तु क्षेत्रस्य जनाः अतीव (*vii*) ........................ सन्ति। अतः भवतां सेवायां निवेदनमस्ति यत् (*viii*) ........................ शीघ्रमेव स्वजनान् सम्प्रेष्य तान् पशून् ग्राहयन्तु भवन्तः येन क्षेत्रे (*ix*) ........................ भवेत्।
वयं भवताम् आभारिणः भविष्यामः।
सधन्यवादम्।

निवेदकः
(*x*) ........................

मञ्जूषा

| |
|---|
| भयग्रस्ताः, पशून्, आयुक्तमहोदयाः, शरीराणाम्, शान्तिः, क्षेत्रे, अन्नानि, जनान्, धनराजः, समयेभ्यः |

23 **मञ्जूषायाः उचितपदैः निम्नलिखितानि पत्राणि पूरयत–** 5

भवान् दशमी कक्षाया: छात्र: निर्णीत: अस्ति। भवान् रचना सागर (प्रा०) लि० संस्थानेन सद्य: प्रकाशितं 'टुगेदर विद संस्कृतम् (*Together with®* Sanskrit)' पुस्तकं प्राप्तुम् इच्छति। अत: तस्य निर्देशकं प्रति मञ्जूषाया: सहायतया लिखितमिदं पत्रं सम्पूरयतु भवान्–

1/17 आर्यसमाज मार्ग:
(*i*) ........................
नवदिल्लीत:
तिथि: ........................

(*ii*) ........................
निर्देशक महोदय!
रचना सागर (प्रा०) लि०
नवदिल्ली
विषय: – संस्थानेन सद्य: प्रकाशितं 'टुगेदर विद संस्कृतं पुस्तकं प्रेषणार्थं निर्देशकं प्रति पत्रम्।

महोदय,
अहं राष्ट्रीय पब्लिक विद्यालयस्य (*iii*) ........................ छात्र: अस्मि। मया ज्ञातं यत् भवद्भि: संस्कृतस्य मणिका-पुस्तके आधारितं नवीनं (*iv*) .................... प्रकाशितं वर्तते। तस्य पुस्तकस्य छात्रेभ्य: महती आवश्यकता अस्ति। तत् पुस्तकं (*v*) ..................... सज्जार्थं परिपूर्णं मन्यते।
अहम् अपि तत्पुस्तकं (*vi*) .............................. इच्छामि। अत: भवतां सेवायां निवेदनमस्ति यत् भवन्त: उपरिलिखिते मम (*vii*) ........................ शीघ्रमेव पुस्तकं प्रेषयन्तु। अहं तस्य मूल्यम् अनेन पत्रेण सह एव (*viii*) ........................।
अहं भवतां (*ix*) ........................ भविष्यामि।

(*x*) ........................
निर्णीत:

मञ्जूषा

| |
|---|
| परीक्षाया:, शाहदरा, पुस्तकम्, सेवायाम्, नवमी कक्षाया:, निर्णीत:, क्रेतुम्, धन्यवाद:, वेष्टने, प्रेषयामि |

24 **मञ्जूषाया: उचितपदै: निम्नलिखितानि पत्राणि पूरयत–** 5

भवत्या: नाम दिव्यालक्ष्मी वर्तते। भवती प्रधानमन्त्रिणा उद्घोषित 'बेटी बचाओ, बेटी पढ़ाओ' विषयमुपरि एकं स्वलेखं प्रकाशयितुम् इच्छति। अतः देशस्य प्रतिष्ठित-पत्रिकायाः वामायाः सम्पादिकां प्रति स्वलेखेन सह मञ्जूषायाः सहायतया पत्रं लिखतु भवती–

18/10 गोविन्द विहारः
(*i*) ........................
तिथिः ........................

सेवायाम्,
पूज्ये (*ii*) ........................!
'वामा' साप्ताहिकम्
ब० शा० ज़० मार्गः
नवदिल्ली–1
विषयः – 'बेटी बचाओ, बेटी पढ़ाओ' विषये लिखितं स्वलेखं प्रकाशनार्थं पत्रम्।
महोदये!
सविनयं निवेदनम् अस्ति यत् सम्माननीय प्रधानमन्त्रिणा श्रीमोदी (*iii*) ........................ सञ्चालितम् अभियानं 'बेटी बचाओ, बेटी पढ़ाओ' कन्यानां संरक्षणार्थं सम्पूर्णे (*iv*) ........................ प्रचलाति। इदम् अभियानं देशाय अति लाभकरं वर्तते। अनेन देशे (*v*) ........................ संख्यासु वृद्धिः अभवत्।
मया अस्मिन् (*vi*) ........................ एकः लेखः लिखितोऽस्ति अतः एकेन पत्रेण सह तं (*vii*) ........................ प्रकाशनार्थं भवतीनां सेवायां प्रेषयामि। कृपया स्वप्रतिष्ठित-पत्रिकायाम् इमं लेखं प्रकाशित्य माम् अनुगृह्णातु (*viii*) ........................।
आशास्ति यत् अनेन लेखेन नारीं प्रति (*ix*) ........................ जनेषु आगमिष्यति।
सधन्यवादम्।

(*x*) ........................ विश्वासुः
दिव्यालक्ष्मी

मञ्जूषा

| |
|---|
| अभियाने, महाभागेन, चण्डीगढ़म्, देशे, सम्पादिका महोदये, कन्यानाम्, भवत्याः, भवती, लेखम्, जागरुकता |

25 **मञ्जूषायाः उचितपदैः निम्नलिखितानि पत्राणि पूरयत–** 5

भवान् कुलदीपकः अस्ति। 'पाञ्चजन्य' साप्ताहिके पत्रे भवान् पत्रकारः एकं समाचारं प्रकाशयितुम् इच्छति। अतः तस्य प्रकाशनार्थं पत्रस्य सम्पादकं प्रति मञ्जूषायाः सहायतया भवान् तत्पत्रं सम्पूर्य लिखतु–

1/17 जनकपुरी
(i) ..........................
तिथिः ..........................

सेवायाम्,
सम्पादक-महोदय!
(ii) ..........................
नवदिल्ली
सादरं प्रणामम्।
विषयः – 'पाञ्चजन्य' साप्ताहिकपत्रे स्वमौलिकसमाचारं प्रकाशनार्थम् पत्रम्।
महोदये!
निवेदनम् अस्ति यत् अहं जनकपुरी क्षेत्रस्य निवासी एकः (iii) .......................... अस्मि। मम पत्रकारिता, विवरणं समाचारं वा समये-समये देशस्य अनेकेषु (iv) .......................... प्रकाशयन्ते। सम्प्रति अहं केनचिन्माध्यमेन भवतां प्रतिष्ठितस्य साप्ताहिकपत्रस्य (v) ..................... श्रुतवान्। अतः स्वक्षेत्रस्य एक अतीव (vi) .......................... समाचारं तस्मिन् पत्रे (vii) .......................... प्रेषयामि। कृपया इमं (viii) .......................... स्वप्रतिष्ठिते पत्रे प्रकाशयतु भवान्।
भवताम् अतीव (ix) .......................... भविष्यति।

भवतां विश्वासुः
(x) ..........................

मञ्जूषा

| |
|---|
| धन्यवादः, महत्त्वपूर्णम्, नवदिल्लीतः, पत्रकारः, कुलदीपकः, विषये, समाचारम्, प्रकाशनार्थम्, 'पाञ्चजन्यः' समाचारपत्रम्, पत्रेषु |

26 अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत– 5

(i) आज लोग विद्या का महत्त्व जानते हैं।
(ii) कुत्ते गाँव के चारों ओर घूमते हैं।
(iii) तुम दोनों क्या चाहते हो?

(iv) मैं भीख नहीं चाहता हूँ।

(v) हम सब गुरुजी से व्याकरण पढ़ेंगे।

27 अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत– 5

(i) माँ बच्चों के पास जाती है।

(ii) पत्नी पति के साथ रहती है।

(iii) पिता पुत्र पर क्रोध करते हैं।

(iv) राक्षस देवताओं से ईर्ष्या करते थे।

(v) शुभकर्म करने वालों को नमस्कार हो।

28 अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत– 5

(i) छात्रों का कल्याण हो।

(ii) हाय राम!

(iii) वह गाँव की ओर जाता है।

(iv) माता गृहकार्य में कुशल है।

(v) घर के नीचे जल है।

29 अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत– 5

(i) वृक्षों के ऊपर कौवे बैठे हैं।

(ii) लोगों के मनों में देश के प्रति प्रेम होना चाहिए।

(iii) हम दोनों तुम दोनों को देखते हैं।

(iv) माँ बच्चे से प्यार करती है।

(v) बच्चे विद्या को चाहते हैं।

30 अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत– 5

(i) स्वामी दयानन्द ने सत्यार्थ प्रकाश लिखा है।

(ii) नववर्ष की आपके लिए शुभकामनाएँ।

(iii) आर्य समाज विद्या का प्रकाश करता है।

(iv) मैं देवालय जाकर पूजा करूँगा।

(v) संस्कृत सभी भाषाओं की माता है।